# ॥ શ્રીમુત્તુક્કુમારસુબ્રહ્મણ્યમૂર્તિસહસ્રનામસ્તોત્રમ્ ॥

.. Shri Muthukkumarasubrahmanyamurti SahasranAmastotram ..

sanskritdocuments.org

August 20, 2017

# .. Shri Muthukkumarasubrahmanyamurti SahasranAmastotram ..

# ॥ શ્રીમુત્તુક્કુમારસુબ્રહ્મણ્યમૂર્તિસહસ્રનામસ્તોત્રમ્ ॥

## Sanskrit Document Information


Text title : shrI kumArasubrahmaNyamUrtisahasranAmastotram

File name : kumArasubrahmaNyamUrtisahasranAmastotra.itx

Category : sahasranAma, subrahmanya

Location : doc_subrahmanya

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : PSA Easwaran, Sivakumar Thyagarajan

Proofread by : PSA Easwaran, Sivakumar Thyagarajan

Latest update : October 9, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીમુત્તુક્કુમારસુબ્રહ્મણ્યમૂર્તિસહસ્રનામસ્તોત્રમ્ ॥

શ્રીવૈદ્યેશ્વરમન્દિરસ્થિત (કુમ્ભઘોણનગરસ્ય નિકટવર્તિ (તમિળ્ નાડુ)
વૈત્તીશ્વરન્ કોવિલ્) મુત્તુક્કુમારન્ સુબ્રહ્મણ્યમૂર્તિસહસ્રનામસ્તોત્રમ્
Sahasranama is on Lord Subrahmanya at Vaitheeswaran Koil.

॥ધ્યાનમ્ ॥

ષડ્વક્ત્રં શિખિવાહનં ત્રિનયનં વલ્લીશસેનાપતિં
વજ્રં શક્તિમસિં ત્રિશૂલમભયં ખેટં ધનુશ્ચક્રકમ્ ।
પાશં કુક્કુટમઙ્કુશં ચ વરદં દોર્ભિર્દધાનં શિવં
સુબ્રહ્મણ્યમુપાસ્મહે પ્રણમતાં ભીતિપ્રણાશોદ્યતમ્ ॥

ગાઙ્ગેયં વહ્નિબીજં શરવણજનિતં જ્ઞાનશક્તિં કુમારં
બ્રહ્માણં સ્કન્દદેવં ગુહમચલભિદં રૌદ્રતેજઃસ્વરૂપમ્ ।
સેનાન્યં તારકઘ્નં ગજમુખસહિતં કાર્તિકેયં ષડાસ્યં
સુબ્રહ્મણ્યં મયૂરધ્વજસહિતમજં દેવદેવં નમામિ ॥

॥ ૐ શ્રીગણેશાય નમઃ ॥

અથ શ્રીમુત્તુક્કુમારસુબ્રહ્મણ્યમૂર્તિસહસ્રનામસ્તોત્રમ્ ।

અનન્તશ્ચામલોઽનાદિરમરોઽનન્તસદ્ગુણઃ ।
અચ્યુતશ્ચાનઘોઽનન્તસ્વરૂપો નિષ્કલદ્યુતિઃ ॥ ૧॥

અનન્તફલદોઽખણ્ડરૂપોઽનન્તોદરોઽતુલઃ ।
આનુકૂલ્યોઽનન્તસૌખ્યઃ સુન્દરશ્ચામરાધિપઃ ॥ ૨॥ ૧૦
ષણ્માતૃનન્દનઃ સ્વર્ણભૂષણઃ ષણ્મુખોઽમૃતઃ ।
હરસૂનુઃ પિતા ચાષ્ટાદશાર્ણશ્ચાદિદેશિકઃ ॥ ૩॥

અગજાકુચપીયૂષભોક્તાઽઽખણ્ડલાર્તહૃત્ ।
અનેકાસુરસંહારી તારકબ્રહ્મદેશિકઃ ॥ ૪॥

સચ્ચિદાનન્દરૂપી ચ વિધીન્દ્રસુરવન્દિતઃ ।
કુમારઃ શઙ્કરસુતઃ હારકેયૂરભૂષિતઃ ॥ ૫॥

ષટ્કિરીટધરો બ્રહ્મા આધારશ્ચ પરાત્પરઃ ।
આદિત્યસોમભૌમાદિગ્રહદોષવિભઞ્જનઃ ॥ ૬॥

શ્રીમાન્ શિવગિરીશશ્ચ ભક્તસંસ્તુતવૈભવઃ ।
અગસ્ત્યમુનિસમ્બોદ્ધા અમરાર્તિપ્રભઞ્જનઃ ॥ ૭॥

મુકુન્દભાગિનેયશ્ચ દ્વિષણ્ણેત્રો દ્વિષડ્ભુજઃ ।
ચન્દ્રાર્કકોટિસદૃશઃ શચીમાઙ્ગલ્યરક્ષકઃ ॥ ૮॥

હિમાચલસુતાસૂનુઃ સર્વજીવસુખપ્રદઃ ।
આત્મજ્યોતિશ્શક્તિપાણિર્ભક્તસંરક્ષણોદ્યતઃ ॥ ૯॥

ચાતુર્વર્ણ્યેષ્ટફલદઃ વલ્લીશો દુઃખનાશકઃ ।
સર્વમોક્ષપ્રદઃ પુણ્યદૃશ્યો ભક્તદયાનિધિઃ ॥ ૧૦॥

કોટિકન્દર્પલાવણ્ય ઇચ્છાજ્ઞાનક્રિયાન્વિતઃ ।
હરિબ્રહ્મેન્દ્રમૌલ્યગ્રછન્નપાદામ્બુજદ્વયઃ ॥ ૧૧॥

વલ્લીભાષણસુપ્રીતો દિવ્યાઙ્ગવનમાલિકઃ ।
ઇષ્ટાર્થદાયકો બાલઃ બાલચન્દ્રકલાધરઃ ॥ ૧૨॥

શિષ્ટહૃત્પદ્મનિલયો દુષ્ટચોરકુલાન્તકઃ ।
કોટિકોટિમહાસિદ્ધમુનિવન્દિતપાદુકઃ ॥ ૧૩॥ ૭૦
ઈશશ્ચેશાધિપશ્ચેશદેશિકશ્ચેશ્વરાત્મજઃ ।
ઈશાનાદિમધ્યાન્તબ્રહ્મપ્રણવષણ્મુખઃ ॥ ૧૪॥

ઈશાગ્રો લયભીતિઘ્નઃ વિઘ્નરાજસહોદરઃ ।
ઇન્દ્રવારુણકૌબેરવિરિઞ્ચ્યાદિસુખપ્રદઃ ॥ ૧૫॥

ઈશકૈલાસનિલય ઈશસંસ્તુતવૈભવઃ ।
કલ્પવૃક્ષાદિકૌદાર્યસ્સર્વવેદાગ્રવાસભૂઃ ॥ ૧૬॥

સર્વસિદ્ધિપ્રદઃ સર્વસુખદઃ કીર્તિમાન્ વિભુઃ ।
ઇન્દિરારમણપ્રીતઃ મૃત્યુભીત્યાદિનાશકઃ ॥ ૧૭॥

સર્વશત્રુકુલારણ્યજ્વાલાકુલદવાનલઃ ।
અણિમાદ્યષ્ટસિદ્ધીશો વિધિવિષ્ણ્વીશ્વરાધિપઃ ॥ ૧૮॥

ષડાધારામ્બુજગતસર્વદેવસ્વરૂપકઃ ।
શ્રીનીપકુસુમપ્રીત ઇતિબાધાવિનાશકઃ ॥ ૧૯॥

સર્વપુણ્યસ્વરૂપી ચ દાતૄણાં ફલદાયકઃ ।

દેવેન્દ્રકલ્પકો ગૌરીસુતો હૃત્કમલાલયઃ ॥ ૨૦॥

તારકપ્રાણહરણ ઉગ્રશક્ત્યાયુધાધિપઃ ।
સર્વાત્મનાયકઃ કુમ્ભસમ્ભૂતપ્રિયબોધકઃ ॥ ૨૧॥ ૧૦૦
ચન્દ્રકોટિપ્રભોલ્લાસી હુમ્ફટ્કારોત્સુકસ્તથા ।
દેવેશ્વરો નાગભૂષ ઉદ્યદ્ભાસ્કરકુણ્ડલઃ ॥ ૨૨॥

ઉદ્દણ્ડધીરો ગમ્ભીરઃ કૃપાસાગરલોચનઃ ।
એકકાલોદિતાનેકકોટિબાલરવિપ્રભઃ ॥ ૨૩॥

જયન્તાદિસુરાનેકકારાગૃહવિમોચકઃ ।
રુદ્રાધિપ ઉગ્રબાલો રક્તામ્બુજપદદ્વયઃ ॥ ૨૪॥

વિરિઞ્ચિકેશવેન્દ્રાદિસર્વદેવાભયપ્રદઃ ।
વલ્લીન્દ્રતનયાદક્ષવામાલઙ્કૃતસુન્દરઃ ॥ ૨૫॥

નતકુમ્ભોદ્ભવાનેકભક્તસઙ્ઘપ્રિયઙ્કરઃ ।
સત્યાચલસ્થિતઃ શમ્ભુવિજ્ઞાનસુખબોધકઃ ॥ ૨૬॥

ગૌરીશઙ્કરમધ્યસ્થો દેવસઙ્ઘામૃતપ્રદઃ ।
ઉમામહેશનયનપદ્માકરરવિપ્રભઃ ॥ ૨૭॥ var દિવાકરઃ
રણરઙ્ગરમાપ્રોક્તજયશ્રવણકૌતુકઃ ।
અહઙ્કૃતમનોદૂરો દૈત્યતૂલધનઞ્જયખ્ ॥ ૨૮॥

ભક્તચિત્તામૃતામ્બોધિઃ મૌનાનન્તસુખપ્રદઃ ।
અનેકક્ષેત્રનિલયો વાચિકામૃતદાયકઃ ॥ ૨૯॥

પરાદ્રિસ્થોઽર્ણવક્ષેત્રનિલયો દેવપૂજિતઃ ।
અનેકશૈલનિલયો ફલભૂધરનાયકઃ ॥ ૩૦॥

શિવાચલનિવાસી ચ શિવક્ષેત્રાધિનાયકઃ ।
માનસીકપુરાધીશઃ શ્રીશૈલાલયસંસ્થિતઃ ॥ ૩૧॥

મૂલાધારામ્બુજગતો સ્વાધિષ્ઠાનનિકેતનઃ ।
મણીપૂરકપદ્મસ્થ અનાહતસુમસ્થિતઃ ॥ ૩૨॥

વિશુદ્ધિકમલારૂઢ આજ્ઞાચક્રાન્તરસ્થિતઃ ।
પરમાકાશરૂપી ચ નાદબ્રહ્મમયાકૃતિઃ ॥ ૩૩॥

મહાશક્તિર્મહોનાથઃ સર્વલોકાત્મવિગ્રહઃ ।
મહાવલ્લીપ્રિયસ્સર્વરૂપી સર્વાન્તરસ્થિતઃ ॥ ૩૪॥

શિવાર્થઃ સર્વસઞ્જીવી સમસ્તભુવનેશ્વરઃ ।
સર્વસંરક્ષકસ્સર્વસંહારકરતાણ્ડવઃ ॥ ૩૫॥

ચતુર્મુખશિરોદેશમુષ્ટિતાડનવિક્રમઃ ।
બ્રહ્મોપદેષ્ટા બ્રહ્માદિસુરલોકસુખપ્રદઃ ॥ ૩૬॥

યજ્ઞાદિવ્યહવિર્ભોક્તા વરદસ્સર્વપાલકઃ ।
દીનસંરક્ષકોઽવ્યાજકરુણાપૂરવારિધિઃ ॥ ૩૭॥

સર્વલક્ષણસમ્પન્નસ્સચ્ચિદાનન્દવિગ્રહઃ ।
બ્રહ્માનન્દાબ્ધિશીતાંશુઃ કરુણાપૂર્ણલોચનઃ ॥ ૩૮॥

એકાક્ષરમયશ્ચૈવ એકાક્ષરપરાર્થદઃ ।
એકાક્ષરપરઞ્જ્યોતિરેકાન્તમતિબોધકઃ ॥ ૩૯॥

એકાર્થદાયકશ્ચૈકપરશ્ચૈકામ્રનાયકઃ ।
એકાન્તમૌનફલદો વલ્લીમોહનતત્પરઃ ॥ ૪૦॥ ૧૮૦
સપ્તર્ષિવન્દિતપદો બ્રહ્માતીતો મુનિસ્તુતઃ ।
વલ્લીદર્શનસન્તુષ્ટો ભક્તાભીષ્ટવરપ્રદઃ ॥ ૪૧॥

ઉમાશઙ્કરમધ્યસ્થો મહાવૃષભસંસ્થિતઃ ।
સમ્પૂર્ણસ્સર્વલોકાત્મા નીપમાલ્યવિભૂષિતઃ ॥ ૪૨॥ ૧૯૦
કલ્મષઘ્નો ગિરિશયઃ પાપઘ્નો દીનરક્ષકઃ ।
સર્વાભરણભૂષાઙ્ગો વજ્રશક્ત્યાદિધારકઃ ॥ ૪૩॥

પઞ્ચાક્ષરસ્થઃ પઞ્ચાસ્યઃ કણ્ઠીરવમુખાન્તકઃ ।
પઞ્ચભૂતાત્મભૃત્પઞ્ચભૂતેશઃ શચિવન્દિતઃ ॥ ૪૪॥

પઞ્ચવર્ણઃ પઞ્ચબાણકરઃ પઞ્ચતરુપ્રભુઃ ।
ઐઙ્કારરૂપઃ ક્લીઙ્કારઃ સૌઃકારકરુણાનિધિઃ ॥ ૪૫॥

અકારાદિક્ષકારાન્તમયશ્ચૈરાવતાર્ચિતઃ ।
ઐરાવતગજારૂઢસ્સર્વભક્તપ્રિયઙ્કરઃ ॥ ૪૬॥

ઐરાવતાત્મજાવલ્લીનાયિકાપ્રાણવલ્લભઃ ।

ચતુષ્ષષ્ટિકલાનાથો દ્વાત્રિંશલ્લક્ષણોજ્જ્વલઃ ॥ ૪૭॥

મદનાતીતસૌન્દર્યઃ પાષણ્ડજનદૂરગઃ ।
પઞ્ચેન્દ્રિયપ્રેરકશ્ચ પઞ્ચકૃત્યાદિદાયકઃ ॥ ૪૮॥ ૨૨૦
પઞ્ચકૃત્યેશ્વરઃ પઞ્ચમૂર્તયે પઞ્ચામૃતપ્રિયઃ ।
એકાર્થશ્ચૈવ નિર્નાશઃ પ્રણવાર્થદ એવ ચ ॥ ૪૯॥

સર્વજ્યોતિપ્રકાશી ચ રહઃકેલિકુતૂહલઃ ।
દિવ્યજ્યોતિર્વેદમયઃ વેદમૂલોઽર્થસઙ્ગ્રહઃ ॥ ૫૦॥

એકાનેકસ્વરૂપી ચ રવ્યાદિદ્યુતિદાયકઃ ।
ઐરાવતાધિપસુતાનયનાનન્દસુન્દરઃ ॥ ૫૧॥

ચિદાકારઃ પરઞ્જ્યોતિઃ લયોત્પત્તિવિવર્જિતઃ ।
સર્વશત્રુહરો મેષવરારૂઢો વિનાયકઃ ॥ ૫૨॥

એકાતપત્રસામ્રાજ્યદાયકઃ સુમુખાનુજઃ ।
મૃગીપરશુચાપાસિશક્ત્યાદ્યાયુધભૃત્કરઃ ॥ ૫૩॥

શરત્કાલઘનાનીકમહોદારદ્વિષટ્કરઃ ।
શ્રીવલ્લીવામપાર્શ્વસ્થો રવ્યાદિગ્રહદોષભિદ્ ॥ ૫૪॥

પાદકિઙ્કિણિકાનાદદૈત્યવિભ્રમદાયકઃ ।
ઓઙ્કારજ્યોતિરોઙ્કારવાચકાતીતવૈભવઃ ॥ ૫૫॥

ઓઙ્કારચિત્સભાસંસ્થ ઓઙ્કારાદ્ભુતમન્દિરઃ ।
ઓઙ્કારમનુસન્દાતા ઓઙ્કારગિરિસંસ્થિતઃ ॥ ૫૬॥

ઓઙ્કારનાદશ્રવણ ઓઙ્કારાતીતવિગ્રહઃ ।
ઓઙ્કારનાદાન્તગતઃ ઓન્નિત્યાદિષડક્ષરઃ ॥ ૫૭॥

ઓઙ્કારપીઠકાન્તસ્થ ઓઙ્કારમુકુટાગ્રગઃ ।
ઓઙ્કારમૂલસમ્ભૂત ઓઙ્કારાદ્યન્તમધ્યગઃ ॥ ૫૮॥

ઓઙ્કારમૂલબીજાર્થ ઓઙ્કારપરશક્તિમાન્ ।
ઓઙ્કારબિન્દુરોઙ્કારચિત્ત ઓઙ્કારચિત્પુરઃ ॥ ૫૯॥ ૨૭૦
ઓઙ્કારફલસત્સાર ઓઙ્કારજ્ઞાનકોવિદઃ ।
ઓઙ્કારસચ્ચિદાનન્દ ઓઙ્કારપરમાત્મકઃ ॥ ૬૦॥

ઓઙ્કારસમ્ભૂતસપ્તકોટિમન્ત્રાધિનાયકઃ ।
ઓઙ્કારપ્રણવાકાર અકારાદિકલાત્મકઃ ॥ ૬૧॥ ૨૮૦
ષડક્ષરો દ્વાદશાર્ણઃ પ્રણવાગ્રાર્ણસંયુતઃ ।
મહેશસ્તુતિસન્તુષ્ટો શિવશક્ત્યક્ષરાન્વિતઃ ॥ ૬૨॥

પરાક્ષરકલોપેતો શિવબીજકલાશ્રયઃ ।
ઔઙ્કારનાદકરુણ ઔદાસીનજનાન્તકઃ ॥ ૬૩॥

ઔદુમ્બરાશ્વત્થનીપબિલ્વાદિસમિદાહુતઃ ।
દુષ્ટક્રુદ્ધમનોદૂરો શિષ્ટસઙ્ઘસમાશ્રિતઃ ॥ ૬૪॥

અકારાદ્યક્ષરપ્રાણ અકારદ્યક્ષરાર્થકઃ ।
ઉદારસદ્ગુણોપેતો ભક્તૈશ્વર્યપ્રદાયકઃ ॥ ૬૫॥

અકારાદિક્ષકારાન્તકલાકલ્પિતવિગ્રહઃ ।
શ્રીકુમ્ભસમ્ભવાદીનાં સર્વજ્ઞાનોપદેશકૃત્ ॥ ૬૬॥

ષડર્ણમન્ત્રસ્મરણભક્તાભીષ્ટપ્રદાયકઃ ।
સ્કન્દમૂર્તિશ્ચ ગાઙ્ગેયો કલિકલ્મષનાશનઃ ॥ ૬૭॥

ભક્તસન્નિહિતોઽક્ષોભ્યો શઙ્ખપાણિમુખસ્તુતઃ ।
ઓંશ્રીંહ્રીંસૌંશરવણભવઃ શઙ્કરાનન્દ એવ ચ ॥ ૬૮॥

શતલક્ષેન્દુસઙ્કાશઃ શાન્તઃ શશિધરાત્મજઃ ।
શત્રુનાશકરશ્શમ્ભુઃ શચીપતિવરપ્રદઃ ॥ ૬૯॥

શક્તિમાન્ શક્તિહસ્તશ્ચ શાન્તસર્વપ્રકાશકઃ ।
શરભઃ શઙ્ખચક્રાદિધરઃ શઙ્કરબોધકઃ ॥ ૭૦॥

કૃત્તિકાતનયઃ કૃષ્ણો શઙ્ખપદ્મનિધિપ્રદઃ ।
શક્તિવજ્રાદિસમ્પન્નદ્વિષટ્કરસરોરુહઃ ॥ ૭૧॥

શઙ્કુકર્ણમહાકર્ણઘણ્ટાકર્ણાદિવન્દિતઃ ।
મૂલાદિદ્વાદશાન્તસ્થપદ્મમધ્યનિકેતનઃ ॥ ૭૨॥

સદ્ગુણઃ શઙ્કરઃ સાક્ષી સદાનન્દઃ સદાશિવઃ ।
જ્ઞાનેશ્વરઃ સૃષ્ટિકર્તા સર્વવશ્યપ્રદાયકઃ ॥ ૭૩॥

વિચિત્રવેષઃ સમરવિજયાયુધધારકઃ ।

ક્રૌઞ્ચાસુરરિપુઃ શઙ્ખપતિઃ સર્વગણેશ્વરઃ ॥ ૭૪॥

ણકારતુર્યમન્ત્રાર્ણો ણકારાર્ણસ્વરૂપકઃ ।
ણકારમૂલમન્ત્રાગ્રો ણકારરવસંસ્થિતઃ ॥ ૭૫॥

ણકારશિખરારૂઢો ણકારાક્ષરમધ્યગઃ ।
ણદ્વિતીયો ણત્રિતીયઃ ણચતુર્થો ણપઞ્ચમઃ ॥ ૭૬॥

ણષષ્ઠવર્ણો ણાર્ણાદિમન્ત્રષડ્ભેદભાસુરઃ ।
ણકારપીઠનિલયો નલિનોદ્ભવશિક્ષકઃ ॥ ૭૭॥

નાદાન્તકૂટસ્થશ્ચૈવ નારદપ્રિય એવ ચ ।
નાગાશનરથારૂઢો નાન્દાત્મા નાગભૂષણઃ ॥ ૭૮॥

નાગાચલપતિર્નાગો નવતત્ત્વો નટપ્રિયઃ ।
નવગ્રહાદિદોષઘ્નો ણકારસ્તમ્ભનિષ્ક્રિયઃ ॥ ૭૯॥

ણકારાક્ષો ણકારેશઃ ણકારવૃષવાહનઃ ।
તત્ત્વબોદ્ધા દૈવમણિઃ ધનધાન્યાદિદાયકઃ ॥ ૮૦॥

વલ્લીપતિઃ શુદ્ધાન્તરસ્તત્ત્વાતીતો હરિપ્રિયઃ ।
તત્પરઃ કમલારૂઢો ષડાનનસરોરુહઃ ॥ ૮૧॥

ભગવાન્ ભયહન્તા ચ ભર્ગો ભયવિમોચકઃ ।
ભાનુકોપાદિદૈત્યઘ્નો ભદ્રો ભાગીરથીસુતઃ ॥ ૮૨॥

ભવાચલમહાવજ્રો ભવારણ્યદવાનલઃ ।
ભવતાપસુધાવૃષ્ટિર્ભવરોગમહૌષધઃ ॥ ૮૩॥

ભાનુચન્દ્રાગ્નિનયનો ભાવનાતીતવિગ્રહઃ ।
ભક્તચિત્તામ્બુજારૂઢો ભરતોક્તક્રિયાપ્રિયઃ ॥ ૮૪॥

ભક્તદેવો ભયાર્તિઘ્નો ભકારોચ્ચાટનક્રિયઃ ।
ભારતીશમુકુન્દાદિવાઙ્મનોઽતીતવૈભવઃ ॥ ૮૫॥

વિચિત્રપક્ષાશ્વારૂઢો ભુજઙ્ગેશો દયાનિધિઃ ।
ઈશફાલાક્ષિસમ્ભૂતો વીરઃ ષટ્સમયાધિપઃ ॥ ૮૬॥

મહાવ્રતો મહાદેવો ભૂતેશઃ શિવવલ્લભઃ ।
મહામાયી યજ્ઞભોક્તા મન્ત્રસ્થો યક્ષરાટ્પ્રિયઃ ॥ ૮૭॥

સર્વશ્રેષ્ઠો મહામૃત્યુરૂપાસુરવિનાશકઃ ।
રાગાબ્જમાલિકાભૂષો રાગી રાગામ્બરપ્રિયઃ ॥ ૮૮॥

રાગદ્વેષાદિદોષઘ્નો રાગરત્નવિભૂષણઃ ।
રાવણસ્તુતિસન્તુષ્ટો રતીનાયકવન્દિતઃ ॥ ૮૯॥

રમ્ભાદિનાટ્યસુપ્રીતો રાજીવદલલોચનઃ ।
રવચાપધરો રક્ષોવૃન્દતૂલહુતાશનઃ ॥ ૯૦॥

રવિચન્દ્રાદિસમ્પૂજ્યો રથારોહકુતૂહલઃ ।
રવકાઞ્ચીવરધરો રવયુક્તાઙ્ઘ્રિભૂષણઃ ॥ ૯૧॥

રવ્યુદ્ભવસમાનેકહારકેયૂરભૂષિતઃ ।
રવિકોટિસમાનાભો રત્નહાટકદાયકઃ ॥ ૯૨॥

શિખીન્દ્રશ્ચોરગાકારઃ નિશાદિનવિવર્જિતઃ ।
રમાવાણ્યાદિસમ્પૂજ્યો લક્ષવીરભટસ્તુતઃ ॥ ૯૩॥

વીરભૂતગણસ્તુત્યો શ્રીરામશ્ચારુણો રવિઃ ।
વરદો વજ્રહસ્તશ્ચ વામદેવાદિવન્દિતઃ ॥ ૯૪॥

વલારિતનયાનાથો વરદાભયસત્કરઃ ।
વલ્લીશ્વરીપતિર્વાગ્મી વલ્લીકલ્યાણસુન્દરઃ ॥ ૯૫॥

વલારિમુખ્યવિબુધવૃન્દદુઃખવિમોચકઃ ।
વાતરોગહરો વર્મરહિતો વાસવેશ્વરઃ ॥ ૯૬॥

વાચકસ્થો વાસુદેવવન્દિતો વકુલપ્રિયઃ ।
વાસનાઙ્કિતતામ્બૂલપૂરિતાનનપઙ્કજઃ ॥ ૯૭॥

વચનાગમનાતીતો વામાઙ્ગો વન્દિમોહનઃ ।
વલ્લીમનોહરઃ સાધુઃ દેવેન્દ્રપ્રાણદાયકઃ ॥ ૯૮॥

દિગન્તવલ્લભાનન્તમદનોજ્જ્વલરૂપભૃત્ ।
સૌન્દર્યાર્ણવપીયૂષસ્સર્વાવયવસુન્દરઃ ॥ ૯૯॥

શિશુઃ કૃપાલુઃ કાદમ્બધરઃ કૌબેરનાયકઃ ।
ધર્માધારસ્સર્વધર્મસ્વરૂપો ધર્મરક્ષકઃ ॥ ૧૦૦॥

સર્વધર્મેશ્વરો બન્ધુસ્તીક્ષ્ણોઽનન્તકલાન્વિતઃ ।
અનન્તવેદસંવેદ્યઃ સ્વામી કનકસુપ્રભઃ ॥ ૧૦૧॥

સર્વસાક્ષી સર્વકલાશ્રવણઃ કરુણાલયઃ ।
વાસવસ્સર્વકર્તા ચ કામઃ કપિલસંસ્તુતઃ ॥ ૧૦૨॥

કામદઃ કાલસંહર્તા કાલઃ કામારિસમ્ભવઃ ।
કામાયુધઃ કામધરો શ્રીકૃષ્ણઃ શિખિવાહનઃ ॥ ૧૦૩॥ ૪૯૦
કૃપાનિધિઃ કૃપાસિન્ધુઃ ગિરિરાટ્ કૃત્તિકાપ્રિયઃ ।
કીર્તિપ્રદઃ કીર્તિધરો ગીતનાટ્યાદિકપ્રિયઃ ॥ ૧૦૪॥

નક્કીરસ્તોત્રસન્તુષ્ટસ્તીર્થેશઃ કુલવિદ્ગુહઃ ।
કૌમારસ્સર્વગુપ્તશ્ચ ક્રૌઞ્ચાસુરવિમર્દનઃ ॥ ૧૦૫॥

ઇન્દ્રપુણ્યઃ કુલોત્તુઙ્ગ અતિતીક્ષ્ણાયુધો નટઃ ।
કૂટસ્થઃ શ્રીકરઃ કૂટેશાન્તકાન્તકસમ્ભવઃ ॥ ૧૦૬॥

વલ્લીભાષણસુપ્રીતો ગમ્ભીરો ભક્તનાયકઃ ।
સર્વદેવાલયાન્તસ્થો નિશ્શોકો નિરુપદ્રવઃ ॥ ૧૦૭॥ ૫૨૦
કેદારો મદનાધીશો લયઘ્નઃ શ્રવણાન્વિતઃ ।
પદ્મહસ્તો દેવનુતઃ ભક્તાર્થો દ્વાદશાયુધઃ ॥ ૧૦૮॥

કૈવલ્યો રજતાદ્રીશો મહારાટ્ ગોકર્ણાધિપઃ ।
શૂરમાયામ્રતરુભિદ્ ખણ્ડિતાસુરમણ્ડલઃ ॥ ૧૦૯॥

જયદુર્ગાતિસન્તુષ્ટો સર્વદેવસ્તવાઙ્કિતઃ ।
હિતઃ કોલાહલશ્ચિત્રો નન્દિતશ્ચ વૃષાપતિઃ ॥ ૧૧૦॥ ૫૪૦
નિગમાઞ્ચો મહાઘોરાસ્ત્રનાથો ગવ્યમોદિનિ ।
સર્વેશઃ સુગુણશ્ચણ્ડો દિવ્યકૌસ્તુભસન્નિભઃ ॥ ૧૧૧॥

ચણ્ડપ્રચણ્ડઃ સમરવિજયી નિરહઙ્કૃતિઃ ।
સર્વસ્વામી ચણ્ડહર્તા ષડ્વક્ત્રશ્શામ્ભવઃ સુખી ॥ ૧૧૨॥

સાઙ્ગઃ સાયુજ્યદઃ સારઃ સામઃ સામ્રાજ્યદાયકઃ ।
સિદ્ધઃ શિવશ્ચિદ્ગુણશ્ચ ચિન્મયશ્ચિત્સ્વરૂપકઃ ॥ ૧૧૩॥

શૃઙ્ગારરસસમ્પૂર્ણશ્ચિત્તસ્થઃ સામપારગઃ ।
શિવલોકેશ્વરઃ સિદ્ધવરઃ સિદ્ધવરાર્ચિતઃ ॥ ૧૧૪॥

સર્વજીવસ્વરૂપી ચ શ્રીદઃ શ્રીધરવન્દિતઃ ।
શુદ્ધઃ શીતઃ સ્વયઞ્જ્યોતિઃ સુબ્રહ્મણ્યઃ શુભપ્રદઃ ॥ ૧૧૫॥

શ્રુતિજ્ઞઃ સુલભઃ શૂરઃ શુદ્ધધીરશ્ચ શૂરહા ।
શૂરાત્મશોધકઃ શૂરસ્મર્તા ચ વિભવપ્રદઃ ॥ ૧૧૬॥

સર્વૈશ્વર્યપ્રદઃ સર્વજયદો બ્રહ્મસમ્ભવઃ ।
જયધીરઃ શ્રીકરશ્ચ સિન્ધુક્ષેત્રઃ સલક્ષણઃ/સુલક્ષણઃ ॥ ૧૧૭॥

અભક્તકાલો રક્તાભશેખરોઽતુલવિક્રમઃ ।
શૈવાધિપઃ શૈવમણિઃ શૈવધન્યશ્શિવાત્પરઃ ॥ ૧૧૮॥

ચૈતન્યઃ ક્રૌઞ્ચભેદી ચ ગિરીશો નિગમેશ્વરઃ ।
સ્વર્ગાધિપસ્સુરૂપી ચ સ્વર્ગલોકાદિસૌખ્યદઃ ॥ ૧૧૯॥

સ્વચ્છઃ સ્વયમ્ભૂર્ભૌમાખ્યસ્સોમધૃત્કુક્કુટધ્વજઃ ।
જ્યોતિર્હલ્લકશૈલસ્થઃ સોમઃ શોકભયાપહઃ ॥ ૧૨૦॥

હિતઃ પશુપતિઃ સૌમ્યો નતસૌભાગ્યદાયકઃ ।
સૌવર્ણબીજઃ સૌન્દર્યો દણ્ડપાણિર્ધનપ્રદઃ ॥ ૧૨૧॥

એકદેવઃ સર્વપિતા ધનિકો દ્રાવિડપ્રિયઃ ।
ચણ્ડારિસ્તારકઃ સ્થાણુઃ સર્વધાન્યપ્રદાયકઃ ॥ ૧૨૨॥

માતૃભૂતસ્તારકારિર્દિવ્યમાલ્યવિભૂષિતઃ ।
ચિત્સભેશો દિશાન્નાથઃ ધનુર્હસ્તો મહાભુજઃ ॥ ૧૨૩॥ ૬૪૦
મહાગુણો મહાશૌર્યઃ સર્વદારિદ્ર્યનાશકઃ ।
દીર્ઘો દિગમ્બરસ્તીર્થઃ સર્વતીર્થફલપ્રદઃ ॥ ૧૨૪॥

રોગઘ્નો દુષ્ટહર્તા ચ સર્વદુષ્ટભયઙ્કરઃ ।
આત્મજ્યોતિઃ પવિત્રશ્ચ હૃદ્ગતશ્ચ સહાયકૃત્ ॥ ૧૨૫॥

કારણસ્થૂલસૂક્ષ્માન્તોઽમૃતવર્ષી ચિદમ્બરઃ ।
પરમાકાશરૂપી ચ પ્રલયાનલસન્નિભઃ ॥ ૧૨૬॥

દેવો દક્ષિણકૈલાસવાસી વલ્લીકરાઞ્ચિતઃ ।
દૃઢો દિવ્યોઽમૃતકરો દેવેશો દૈવતપ્રભુઃ ॥ ૧૨૭॥

કદમ્બમાલાપીયૂષાપ્લુતવક્ષસ્થલાન્વિતઃ ।
દેવસેનાપતિર્દેવધન્યો દેવગિરિસ્થિતઃ ॥ ૧૨૮॥

સર્વજ્ઞો દેશિકો ધૈર્યઃ સુરવૈરિકુલાન્તકઃ ।
વટુકાનન્દનાયોધદ્વાધઘોષામિતપ્રિયઃ ॥ ૧૨૯॥

પુષ્યર્ક્ષઃ કુણ્ડલધરો નિત્યો દોષવિભઞ્જનઃ ।
પ્રારબ્ધસઞ્ચિતાગામ્યપાતકાદિપ્રભઞ્જનઃ ॥ ૧૩૦॥

મહાજયો મહાભૂતો વીરબાહ્વાદિવન્દિતઃ ।
ચોરારિઃ સત્ત્વમાર્ગસ્થઃ અલક્ષ્મીમલનાશકઃ ॥ ૧૩૧॥

સ્તુતિમાલાલઙ્કૃતાઢ્યો નન્દીકેશો હરપ્રિયઃ ।
સર્વસૌખ્યપ્રદાતા ચ નવવીરસમાવૃતઃ ॥ ૧૩૨॥

પરમેશો મહારુદ્રો મહાવિષ્ણુઃ પ્રજાપતિઃ ।
વીણાધરમુનિસ્તુત્યશ્ચતુર્વર્ગફલપ્રદઃ ॥ ૧૩૩॥

નિર્ગુણશ્ચ નિરાલમ્બો નિર્મલો વિષ્ણુવલ્લભઃ ।
નિરામયો નિત્યશુદ્ધો નિત્યમઙ્ગલવિગ્રહઃ ॥ ૧૩૪॥

શિખણ્ડી નીપબાહુશ્ચ નીતિર્નીરાજનદ્યુતિઃ ।
નિષ્કોપશ્ચ મહોદ્યાનઃ સૂક્ષ્મો મેર્વાદિમન્દિરઃ ॥ ૧૩૫॥

સૂક્ષ્માતિસૂક્ષ્મો ભાલાક્ષો મહાન્ સર્વોપદેશકઃ ।
સર્વવેષકલાતીત ઉપવીતી શતક્રતુઃ ॥ ૧૩૬॥ ૭૨૦
વેદાગમપુરાણજ્ઞો નૂપુરાઙ્ઘ્રિસરોરુહઃ ।
હૃત્પૂર્ણઃ પઞ્ચભૂતસ્થો કૃપામાર્ગોઽમ્બુજાશ્રયઃ ॥ ૧૩૭॥

સન્નિધિઃ પ્રીતચિત્તોઽથ નિષ્પ્રીતિશ્ચાત્મસંસ્થિતઃ ।
ઔપમ્યરહિતઃ પ્રીતચિત્તગો નૈમિશાશ્રયઃ ॥ ૧૩૮॥

નૈમિશારણ્યનિવસન્મુનીન્દ્રનિકરસ્તુતઃ ।
ઘણ્ટારવપ્રીતમનાઃ દયાચિત્તો સતાઙ્ગતિઃ ॥ ૧૩૯॥ ૭૪૦
સર્વાપદાન્નિહન્તા ચ સદ્યોઽભીષ્ટવરપ્રદઃ ।
સર્વજીવાન્તરજ્યોતિશ્છન્દસ્સારો મહૌષધિઃ ॥ ૧૪૦॥

પઞ્ચાક્ષરપરઞ્જ્યોતિઃ સૂક્ષ્મપઞ્ચેન્દ્રિયદ્યુતિઃ ।

જ્ઞાનચક્ષુર્ગતજ્યોતિઃ સૌઙ્કારપરમદ્યુતિઃ ॥ ૧૪૧॥

પરશ્ચ ફલશૈલસ્થઃ બાલરૂપઃ પરાઙ્ગકઃ ।
પરમેષ્ઠી પરન્ધામ પાપનાશી પરાત્પરઃ ॥ ૧૪૨॥

ગોક્ષીરધવલપ્રખ્યઃ પાર્વતીપ્રિયનન્દનઃ ।
કટાક્ષકરુણાસિન્ધુર્યમવૃક્ષકુઠારિકઃ ॥ ૧૪૩॥

પ્રભુઃ કપર્દી બ્રહ્મેશઃ બ્રહ્મવિદ્ પિઙ્ગલપ્રભઃ ।
સ્વાધિષ્ઠાનપુરાધીશઃ સર્વવ્યાધિવિનાશકઃ ॥ ૧૪૪॥

વૈભવઃ કનકાભાસઃ ભીષણો નિગમાસનઃ ।
ભીતિઘ્નસ્સર્વદેવેડ્યઃ પુણ્યસ્સત્ત્વગુણાલયઃ ॥ ૧૪૫॥

પુણ્યાધિપઃ પુષ્કરાક્ષઃ પુણ્ડરીકપુરાશ્રયઃ ।
પુરાણઃ પુઙ્ગવઃ પૂર્ણઃ ભૂધરો ભૂતિધારકઃ ॥ ૧૪૬॥ ૭૮૦
પ્રાચીનઃ પુષ્પસદ્ગન્ધઃ રક્તપુષ્પપ્રિયઙ્કરઃ ।
વૃદ્ધો મહામતિકરઃ મહોલ્લાસો મહાગુણઃ ॥ ૧૪૭॥

મોક્ષદાયી વૃષાઙ્કસ્થઃ યજમાનસ્વરૂપભૃત્ ।
અભેદ્યો મૌનરૂપી ચ બ્રહ્માનન્દો મહોદરઃ ॥ ૧૪૮॥

ભૂતપ્રેતપિશાચઘ્નઃ શિખી સાહસ્રનામકઃ ।
કિરાતતનયાપાણિપદ્મગ્રહણલોલુપઃ ॥ ૧૪૯॥

નીલોત્પલધરો નાગકઙ્કણઃ સ્વર્ણપઙ્કજઃ ।
સુવર્ણપઙ્કજારૂઢઃ સુવર્ણમણિભૂષણઃ ॥ ૧૫૦॥

સુવર્ણશૈલશૃઙ્ગસ્થઃ સુવર્ણાઙ્ગદશોભિતઃ ।
કાલજ્ઞાની મહાજ્ઞાની અમરાચલનાયકઃ ॥ ૧૫૧॥

લયસમ્ભવનિર્મુક્તઃ કમલોદ્ભવદણ્ડકઃ ।
સપ્તાબ્ધિશોષકૃદષ્ટકુલાચલવિભેદકઃ ॥ ૧૫૨॥

મન્ત્રબીજો વરાબીજો મન્ત્રાત્મા મન્ત્રનાયકઃ ।
મન્ત્રાલયો મયૂરસ્થો મયૂરાચલનાયકઃ ॥ ૧૫૩॥ ૮૨૦
માયાધરો મહામન્ત્રો મહાદેવો મહાબુધઃ ।
માયાપરો મહામાયી મહાસેનો મહાપ્રભુઃ ॥ ૧૫૪॥

અગ્રબુદ્ધિરગ્રગણ્યો મિથ્યાવાદિકુલાન્તકઃ ।
મુક્તિગ્રહઃ કલ્મષઘ્નઃ સર્વદેવજરાપહઃ ॥ ૧૫૫॥

સર્વદેવાઙ્કુરો મુક્ત અતિબાલો મુનીશ્વરઃ ।
દિગમ્બરો ભક્તિનિધિઃ સર્વદેવાગ્રગણ્યકઃ ॥ ૧૫૬॥

અચ્યુતઃ સર્વસમ્પૂર્ણો મહાવિષ્ણુસુસંસ્તુતઃ ।
મૂર્તિર્બ્રહ્માણ્ડકૂટસ્થો મૂલભૂતસ્ત્રિમૂર્તિભૃત્ ॥ ૧૫૭॥

નામપારાયણપરભક્તાભીષ્ટપ્રદાયકઃ ।
ચિદ્રૂપઃ ષટ્ક્રમાનન્દો મહાસારસ્વતપ્રદઃ ॥ ૧૫૮॥

જ્યોતિર્મયો ગિરિશયઃ નવદુર્ગાભિવન્દિતઃ ।
મુકુટાઙ્ગદકેયૂરકાઞ્ચીકિઙ્કિણિભૂષિતઃ ॥ ૧૫૯॥

નારાયણવિરિઞ્ચ્યાદિદેવાભીતિપ્રદાયકઃ ।
મેષારૂઢઃ પઞ્ચવર્ણઃ સર્વવાદ્યપ્રિયઙ્કરઃ ॥ ૧૬૦॥

મૌનેશ્વરો મોક્ષનાથઃ દ્વાદશાન્તઃપુરેશ્વરઃ ।
દેવાવૃતો દીનબન્ધુર્વલ્લીલીલામનોહરઃ ॥ ૧૬૧॥

વન્દારુમહદૈશ્વર્યદાયકો વન્દનપ્રિયઃ ।
વકારાચ્છત્રુસંહર્તા વકારાચ્છત્રુપીડકઃ ॥ ૧૬૨॥

વકારાચ્છત્રુવાક્સ્તમ્ભો વકારાત્કલિનાશકઃ ।
વકારાચ્છત્રુસંહારી સકારાચ્છત્રુવઞ્ચકઃ ॥ ૧૬૩॥

વકારાદ્ભૂતપૈશાચપ્રેતાદિભયમોચકઃ ।
વકારાદ્ગ્રહદોષઘ્નો વકારાચ્ચોરનાશનઃ ॥ ૧૬૪॥

વકારાત્સિંહસર્પાશ્વવ્યાઘ્રાદિભયમોચકઃ ।
વકારાન્નિન્દકશ્રોત્રનેત્રવાક્સ્તમ્ભનોદ્યતઃ ॥ ૧૬૫॥

વકારાન્મૃત્યુસંહર્તા વકારકુલિશાયુધઃ ।
વકારાર્ણમહારુદ્રો વકારાર્ણમહાસિકઃ ॥ ૧૬૬॥

વકારાદ્વૈરિનિરરાટ્ચોરચિત્તાદિવિભ્રમઃ ।
વચસ્યો વટુકો વહ્નિર્વરુણો વાચકો વસુઃ ॥ ૧૬૭॥ ૮૯૦
વશ્યો વસુપ્રદો દાતા વામનો વચનાત્પરઃ ।

વાગીશો વામનયનો વામઃ સામપરાયણઃ ॥ ૧૬૮॥

વામક્રમાર્ચનપ્રીતો વિશાખો વિમલો વિધુઃ ।
વિદ્રુમાભો ઘનો બીજોઽનન્તસૌદામિનીપ્રભઃ ॥ ૧૬૯॥

નિરન્તરો મન્દિરશ્ચ નવવીરનુતાઙ્ઘ્રિકઃ ।
વીરો ભીમઃ કિરાતશ્ચ સદાભક્તમનોહરઃ ॥ ૧૭૦॥

સર્વાલયો રથારૂઢ અનન્તપ્રલયાધિપઃ ।
નામરૂપગુણક્ષેત્રભેદાવસ્થાવિવર્જિતઃ ॥ ૧૭૧॥

સર્વપુણ્યાધ્વરફલઃ સર્વકર્મફલપ્રદઃ ।
સર્વાગમપુરાણાદિપાઠકૃત્ફલદાયકઃ ॥ ૧૭૨॥

સર્વસમ્પત્પ્રદઃ સત્યો રાજભોગસુખપ્રદઃ ।
એકઃ પ્રભુઃ સભાનાથો નિષ્કલોઽનન્તવલ્લભઃ ॥ ૧૭૩॥

ઓઙ્કારસિન્ધુનાદાગ્રનટનાનન્દવૈભવઃ ।
ષડક્ષરજપોદ્યુક્તપ્રારબ્ધાદિપ્રભેદકઃ ॥ ૧૭૪॥

અનન્તભુવનાધીશ આદિમધ્યાન્તવર્જિતઃ ।
ઇન્દ્રાણીમુખમાઙ્ગલ્યરક્ષકશ્ચેપ્સિતાર્થદઃ ॥ ૧૭૫॥

ઉદ્યત્કોટિરવિપ્રખ્ય ઊરુદણ્ડકરદ્વયઃ ।
રુદ્રકોટિસમાકીર્ણલતામણ્ડપમધ્યગઃ ॥ ૧૭૬॥

એલાદિવાસનાપ્રીત ઐરાવતગજસ્થિતઃ ।
ઓઙ્કારચિત્સભાનાથ ઔદાર્યગુણદાયકઃ ॥ ૧૭૭॥

અમ્બિકાહૃદયાનન્દ અચ્યુતેશવિધિસ્તુતઃ ।
કરુણારસનિષ્યન્દસમ્પૂર્ણદ્વાદશેક્ષણઃ ॥ ૧૭૮॥

ખાદિપૃથ્વ્યન્તભૂતાત્મા ગણ્ડમણ્ડલશોભિતઃ ।
ઘટસમ્ભવસુપ્રીતઃ સુન્દરશ્ચન્દ્રભૂષણઃ ॥ ૧૭૯॥

છત્રવર્યધરો જમ્ભભેત્તૃસર્વેષ્ટદાયકઃ ।
ઝલજ્ઝલિતઝઙ્કારકાલીકઙ્કણભૂષિતઃ ॥ ૧૮૦॥

જ્ઞાનસાગરપૂર્ણેન્દુ ટઙ્કશૂલાદિધારકઃ ।
ઠકારમધ્યગો ડમ્ભગમ્ભીરગુણસમ્ભ્રમઃ ॥ ૧૮૧॥ ૯૬૦

ઢક્કાશૂલધરાનેકવટુકાદિમસેવિતઃ ।
ણકારમૂલનિલયસ્તાટઙ્કાભરણોજ્જ્વલઃ ॥ ૧૮૨॥

સ્થાણુર્દયાલુર્ધનદો નવવીરાદિસંવૃતઃ ।
પાપાચલમહાવજ્રો ફણિભુગ્વાહનસ્થિતઃ ॥ ૧૮૩॥

બલિપ્રિયો ભયાર્તિઘ્નો વરષટ્ચક્રમધ્યગઃ ।
યક્ષાધિપેશો રાજીવલોચનો લક્ષણોજ્જ્વલઃ ॥ ૧૮૪॥

વલ્મીકેશો શરવણભવસ્તથા ષણ્મુખસુન્દરઃ ।
સમસ્તજગદાધારો હસ્તદ્વાદશપઙ્કજઃ ॥ ૧૮૫॥

લકારતત્ત્વરૂપી ચ ક્ષમાસમ્પૂર્ણવારિધિઃ ।
જ્ઞાનશક્તિધરઃ સ્કન્દઃ અગ્નિભૂર્બાહુલેયકઃ ॥ ૧૮૬॥

કુમારઃ ષણ્મુખશ્ચૈવ કૃત્તિકાસુત એવ ચ ।
શક્ત્યાયુધધરઃ શરસમ્ભવઃ શરવણોદ્ભવઃ ॥ ૧૮૭॥

ગાઙ્ગેયસ્તારકારિશ્ચ દેવસેનાપતિર્ગુહઃ ।
બ્રહ્મચારી શિવજ્યોતિઃ ક્રૌઞ્ચધારી શિખિસ્થિતઃ ॥ ૧૮૮॥ ૧૦૦૦
વિદ્યાપ્રદો વિજયદો બલદઃ સર્વરક્ષકઃ ।
સ્વાશ્રિતશ્રીકરઃ સ્વર્ણવર્ણાઙ્ગઃ સૌખ્યદાયકઃ ॥ ૧૮૯॥

ભવસ્યદેવસ્યસુતઃ સર્વસ્યદેવસ્યસુતઃ ।
ઈશાનસ્યદેવસ્યસુતઃ પશુપતેર્દેવસ્યસુતઃ ॥ ૧૯૦॥

રુદ્રસ્યદેવસ્યસુતઃ ઉગ્રસ્યદેવસ્યસુતઃ ।
ભીમસ્યદેવસ્યસુતઃ મહતોદેવસ્યસુતઃ ॥ ૧૯૧॥

શ્રીવલ્લીદેવસેનસમેતશ્રીકુમારસુબ્રહ્મણ્યમૂર્તયે નમઃ । ૧૦૧૬

॥ ઇતિ શ્રીકુમારસુબ્રહ્મણ્યમૂર્તિસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ ૐ નમોભગવતેસુબ્રહ્મણ્યાય ॥

Encoded and proofread by Psa Easwaran psaeaswaran at gmail.com

.. Shri Muthukkumarasubrahmanyamurti SahasranAmastotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*